## इडाया वा। (५४/३६३९)

[1]इडायाः षष्ठीविसर्जनीयस्य वा सकार आदेशो भवति पत्यादिषु परतः छन्दसि विषये। इडायास्पतिः, इडायाः पतिः। 'इडायास्पुत्रः' (ऋ. ३.२९.३), इडायाः पुत्रः। इडायास्पृष्ठम्, इडायाः पृष्ठम्। इडायास्पारम्, इडायाः पारम्। 'इडायास्पदम्' (वा.सं. ४.२२), 'इडायाः पदम्' (तै. १.२.५.१)। इडायास्पयः, इडायाः पयः। [2]इडायास्पोषम्, इडायाः पोषम्॥

## अपदान्तस्य मूर्धन्यः। (५५/२१०)

पदाधिकारो निवृत्तः। अपदान्तस्य इति,[3] मूर्धन्यः इति चैतद् अधिकृतं वेदितव्यम् आपादपरिसमाप्तेः[4]। वक्ष्यति – 'आदेशप्रत्यययोः' (८.३.५९/२१२)। [5]सिषेव। सुष्वाप। अग्निषु। वायुषु। अपदान्तस्य इति किम्? अग्निस्तत्र। वायुस्तत्र। षः इत्येवं सिद्धे मूर्धन्यग्रहणं [6]ढकारार्थम्। अकृढ्वम्। चकृढ्वे॥

## सहेः साडः सः। (५६/३३५)

सहेर्धातोः [7]साड्रूपस्य यः सकारः तस्य मूर्धन्यः आदेशो भवति। जलाषाट्। तुराषाट्। पृतनाषाट्। सहेः इति किम्? सह डेन वर्तते सडः, तस्य अपत्यं साडिः। साड्ग्रहणं किम्? यत्रास्य एतद्रूपं तत्र यथा स्यात्, इह मा भूत् [8]जलासाहम्। तुरासाहम्। सः इति किम्? आकारस्य मा भूत्॥

## इण्कोः। (५७/२११)

इण्कोः इत्येतदधिकृतं वेदितव्यम्। इत उत्तरं यद् वक्ष्यामः, इणः कवर्गाच् च इत्येवं तद् वेदितव्यम्। वक्ष्यति – 'आदेशप्रत्यययोः' (८.३.५९/२१२)। [9]सिषेव। सुष्वाप। अग्निषु। वायुषु। कर्तृषु। [10]हर्तृषु। गीर्षु। धूर्षु। वाक्षु। त्वक्षु। इण्कोः इति किम्? दास्यति। असौ॥

## नुम्विसर्जनीयशर्व्यवायेऽपि। (५८/४३४)

नुम्व्यवायेऽपि विसर्जनीयव्यवायेऽपि शर्व्यवायेऽपि इण्कोः उत्तरस्य सकारस्य मूर्धन्यादेशो भवति। व्यवायशब्दः प्रत्येकमभिसम्बध्यते। नुम्व्यवाये तावत् – सर्पींषि। यजूंषि। [11]हवींषि। विसर्जनीयव्यवाये – सर्पिःषु। [12]यजुःषु। हविःषु। शर्व्यवाये – सर्पिष्षु। यजुष्षु। हविष्षु[13]। नुमादिभिः प्रत्येकं व्यवाये षत्वमिष्यते, न समस्तैः। तेन इह न भवति, निंस्से, निंस्स्वः इति। 'णिसि चुम्बने' (धा.पा. १०२६) इत्येतस्य एतद् रूपम्। अत्र हि नुमा, सकारेण, [14]शरा च व्यवधानम्॥

---

1. इडाशब्दसम्बन्धिनः क.ड.इ. 2. इडायास्पोषः इडायाः पोषः ब.क.ड. 3. च इत्यधिकम् क. 4. यदित ऊर्ध्वमनुक्रमिष्यामः अपदान्तस्य मूर्धन्यो भवति इत्येतत् वेदितव्यम् इत्यधिकम् ब.क.ड.इ.ह. 5. सुषुवे क.ड, सिषेच ह. 6. ढत्वार्थम् क.इ.ड. 7. साड्भूतस्य क.ड. 8. जलासाहम् नास्ति ब. 9. सिषेच ह. 10. भर्तृषु गोषु ब, नौषु क.ड.इ. 11. धनूंषि क, नास्ति ब. 12. यजुःषु धानम् क. 13. बर्हिष्षु इत्यधिकम् इ.ड. 14. शरा नास्ति क.इ.ह.